अधोगरक्तपित्ती च न विरेच्या विजानता ।
नवप्रसूता नारी च मन्दाग्निश्च मदात्ययी ॥
शल्यार्दितश्च रूक्षश्च न विरेच्या विजानता ।
जीर्णज्वरी गरव्याप्तो वातरक्ती भगन्दरी ॥
अर्शःपाण्डूदरग्रन्थिहृद्रोगारुचिपीड़िताः ।
योनिरोगप्रमेहार्त्तगुल्मप्लीहव्रणार्दिताः ॥
विद्रधिच्छर्द्दिविस्फोटविसूचीकुष्ठसंयुताः ।
कर्णनासाशिरोवक्त्रगुदमेढ्रामयान्विताः ॥
प्लीहशोथाक्षिरोगार्त्ताः कृमिक्षारानलार्दिताः ।
शूलिनो मूत्रघातार्त्ता विरेकार्हा नरा मताः ॥
बहुपित्तो मृदुः प्रोक्तो बहुश्लेष्मा च मध्यमः ।
बहुवातः क्रूरकोष्ठो दुर्व्विरेच्यः स कथ्यते ॥
मृद्वी मात्रा मृदौ कोष्ठे मध्यकोष्ठे च मध्यमा ।
क्रूरे तीक्ष्णा मता द्रव्यैर्मृदुमध्यमतीक्ष्णकैः ॥
मृदुर्द्राक्षापयश्चुतैलैरपि विरिच्यते ।
मध्यमस्त्रिवृतातिक्ताराजवृक्षैर्व्विरिच्यते ।
क्रूरः स्नुक्पयसा हेमक्षीरीदन्तीफलादिभिः ॥”
चञ्चुतैलमेरण्डतैलम् । राजवृक्षः धनवहेरा । हेमक्षीरी चोकम् । दन्तीफलं बृहद्दन्तीफलं जयपाल इति प्रसिद्धम् ।
“मात्रोत्तमा विरेकस्य त्रिंशद्वेगैः कफान्तिका ।
वेगैर्व्विंशतिभिर्म्मध्या हीनोक्ता दशवेगिका ॥
द्विपलं श्रेष्ठमाख्यातं मध्यमञ्च पलं भवेत् ।
पलार्द्धञ्च कषायाणां कनीयस्तु विरेचनम् ॥
कल्कमोदकचूर्णानां कर्षमध्वाज्यलेहतः ।
कर्षद्वयं पलं वापि वयोरोगाद्यपेक्षया ॥
पित्तोत्तरे त्रिवृच्चूर्णं द्राक्षाक्वाथादिभिः पिबेत् ।
त्रिफलाक्वाथगोमूत्रैः पिबेत् व्योषं कफार्द्दितः ॥
त्रिवृत्सैन्धवशुण्ठीनां चूर्णमम्लैः पिबेन्नरः ।
वातार्द्दितो विरेकाय जाङ्गलानां रसेन वा ॥
एरण्डतैलं त्रिफलाक्वाथेन द्विगुणेन वा ।
युक्तं पीतं पयोभिर्व्वा न चिरेण विरिच्यते ॥”
शीघ्रमेव विरिच्यत इत्यर्थः ।
“त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम् ।
समृद्वीकारसं क्षौद्रं वर्षाकाले विरेचनम् ॥
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम् ।
द्राक्षाम्बुना सयष्ट्याह्वं शीतलं च घनात्यये ॥”
उदीच्यं बाला । घनात्यये शरदि ।
“पिप्पली नागरं सिन्धुश्यामात्रिवृतया सह ।
लिह्यात् क्षौद्रेण शिशिरे वसन्ते च विरेचनम् ॥”
श्यामा [illegible] ।
“त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम् ।
अभया मरिचं शुण्ठी विडङ्गामलकानि च ।
पिप्पली पिप्पलीमूलं त्वक्पत्रं मुस्तमेव च ।
एतानि समभागानि दन्ती च द्विगुणा भवेत् ॥
त्रिवृताष्टगुणा ज्ञेया षड्गुणा चात्र शर्करा ।
मधुना मोदकान् कृत्वा कर्षमात्रान् प्रमाणतः ॥
एकैकं भक्षयेत् प्रातः शीतञ्चानुपिबेज्जलम् ।
तावद्विरिच्यते जन्तुर्यावदुष्णं न सेवते ।
पानाहारविहारेषु भवेन्निर्यन्त्रणः सदा ॥
विषमज्वरमन्दाग्निपाण्डुकासभगन्दरान् ।
दुर्नामकुष्ठगुल्मार्शोगलगण्डोदरभ्रमान् ॥
विदाहप्लीहमेहांश्च यक्ष्माणं नयनामयान् ।
वातरोगांस्तथाध्मानं मूत्रकृच्छ्राणि चाश्मरीम् ।
पृष्ठपार्श्वोरुजघनजङ्घोदररुजं जयेत् ।
सततं शीलनादेषां पलितानि प्रणाशयेत् ।
अभया मोदका ह्येते रसायनवराः स्मृताः ॥”
अभयामोदको रसायनः ॥ * ॥
“पीत्वा विरेचनं शीतजलैः संसिच्य चक्षुषी ।
सुगन्धि किञ्चिदाघ्राय ताम्बूलं शीलयेद्वरम् ॥
निर्व्वातस्थो न वेगांश्च धारयेन्न शयीत च ।
शीताम्बु न स्पृशेत् क्वापि कोष्णनीरं पिबेन्मुहुः ॥
बलासौषधपित्तानि वायुर्व्वान्ति यथा व्रजेत् ।
रेकात्तथा मलं पित्तं भेषजं च कफो व्रजेत् ॥
दुर्व्विरिक्तस्य नाभिस्तु स्तब्धता कुक्षिशूलरुक् ।
पुरीषवातसङ्गश्च कण्डूमण्डलगौरवम् ॥
विदाहोऽरुचिराध्मानं भ्रमश्छर्द्दिश्च जायते ।
तं पुनः पाचनैः स्नेहैः पक्त्वा संस्निह्य रेचयेत् ॥
तेनास्योपद्रवा यान्ति दीप्ताग्निर्लघुता भवेत् ।
विरेकस्यातियोगेन मूर्च्छा भ्रंशो गुदस्य च ॥
शूलं कफातियोगः स्यान्मांसधावनसन्निभम् ।
मेदोनिभं जलाभासं रक्तञ्चापि विरिच्यति ॥
तस्य शीताम्बुभिः सिक्त्वा शरीरं तण्डुलाम्बुभिः ।
मधुमिश्रैस्तथा शीतैः कारयेद्वमनं मृदु ॥
सहकारत्वचः कल्को दध्ना सौवीरकेण वा ।
पिष्टो नाभिप्रलेपेन हन्त्यतीसारमुल्बणम् ॥
सौवीरन्तु यवैरामैः पक्वैर्व्वा निस्तुषीकृतम् ॥”
सौवीरं सन्धानम् ।
“छागं क्षीरं रसश्चापि वैष्किरं हारिणं तथा ॥
शालिभिः षष्टिकैस्तुल्यं मसूरैर्व्वापि भोजयेत् ।
वर्त्तिकालावविकिरकपिञ्जलकतित्तिराः ।
चकोरक्रकराद्याश्च विष्किराः समुदाहृताः ।
कपिञ्जल इति ख्यातो लोके कपिशतित्तिरः ॥”
क्रकरः कएर इति लोके । हरिणस्ताम्रवर्णमृगः ।
“शीतैः संग्राहिभिर्द्रव्यैः कुर्यात् संग्रहणं भिषक् ।
लाघवे मनसस्तुष्टावनुलोमं गतेऽनिले ।
सुविरिक्तं नरं ज्ञात्वा पाचनं पाययेन्निशि ।
इन्द्रियाणां बलं बुद्धेः प्रसादो वह्निदीप्तता ॥
धातुस्थैर्य्यं वयःस्थैर्य्यं भवेद्रेचनसेवनात् ।
प्रवातसेवां शीताम्बु स्नेहाभ्यङ्गमजीर्णताम् ॥
व्यवायं मैथुनं चैव न सेवेत विरेचितः ।
शालिषष्टिकमुद्गाद्यैर्यवागूं भोजयेत् कृताम् ॥
जाङ्गलविष्किराणां वा रसैः शाल्योदनं हितम् ।
हरिणैणकुरङ्गर्ष्यवातायुमृगमातृकाः ।
राजीवः पृषतश्चैव जाङ्गला शरभादयः ॥”
इति भावप्रकाशः ॥

विरेचनः, पुं, (विशेषेण रेचयतीति । वि + रिच् + णिच् + ल्युः ।) पीलुवृक्षः । इति राजनिर्घण्टः ॥ (विरेचके, त्रि । यथा, सुश्रुते । चिकित्सितस्थाने २४ अध्याये ।
“तेजनं स्वमातस्याग्नेः शिरासुखविरेचनम् ॥”)

विरेफः, पुं, नदमात्रम् । इति धनञ्जयः ॥ रेफशून्यश्च ॥

विरेभितः, त्रि, शब्दितः । विपूर्व्वकरेभधातोः क्तप्रत्ययेन निष्पन्नः ॥

विरोकं, क्ली, (वि + रुच् + घञ् । कुत्वम् ।) छिद्रम् । इति त्रिकाण्डशेषः ॥ (यथा, माघे । ५ । ५४ ।
“नासाविरोकपवनोल्लसितं तनीयो
रोमाञ्चतामिव जगाम रजः पृथिव्याः ॥”)
सूर्य्यकिरणे, पुं । इति हलायुधः ॥ (प्रातःकालः । यथा, ऋग्वेदे । ३ । ५ । २ ।
“पूर्व्वीर्ऋतस्य संदृशश्चकानः संदूतो अद्यौ
दुषसो विरोके ॥”
“विरोके विरोचने प्रातःकाले ।” इति तद्भाष्ये सायणः ॥)

विरोचनः, पुं, (विशेषेण रोचते इति । वि + रुच् + “अनुदात्तेतश्च हलादेः ।” ३ । २ । १४९ । इति युच् ।) सूर्य्यः । (यथा, महाभारते ।३।३।६३।
“दिवाकरः सप्तसप्तिर्धामकेशी विरोचनः ॥”)
अर्कवृक्षः । इत्यमरः ॥ प्रह्लादतनयः । (यथा, महाभारते । १ । ६५ । १९ ।
“प्रह्लादस्य त्रयः पुत्राः ख्याताः सर्व्वत्र भारत ।
विरोचनश्च कुम्भश्च निकुम्भश्चेति भारत ॥”)
अग्निः । चन्द्रः । इति मेदिनी ॥ (यथा, महाभारते । ९ । ३५ । ५२ ।
“तासां तद्वचनं श्रुत्वा इन्द्रः सोममथाब्रवीत् ।
समं वर्त्तस्व भार्य्यासु मा त्वां शप्से विरोचन ॥”
रोहितकवृक्षः । श्योनाकप्रभेदः । पूतिकरञ्जः । इति राजनिर्घण्टः ॥ (दीप्तिशालिनि, त्रि । यथा, महाभारते । १२ । ३४३ । ३४ ।
“तेजसाभ्यधिको सूर्य्यात् सर्व्वलोकविरोचनात् ॥”)

विरोचनसुतः, पुं, (विरोचनस्य सुतः ।) बलिराजः । इति त्रिकाण्डशेषः ॥

विरोधः, पुं, (वि + रुध + घञ् ।) शत्रुता । तत्पर्य्यायः । वैरम् २ विद्वेषः ३ । इत्यमरः ॥ द्वेषः ४ द्वेषणम् ५ । इति शब्दरत्नावली ॥ अनुशयः ६ सन्तुच्छयः ७ । इति जटाधरः ॥ पर्य्यवस्था ८ विरोधनम् ९ । इति संकीर्णवर्गे अमरः ॥ (यथा, रघुः । ६ । ४६ ।
“नीपान्वयः पार्थिव एष यज्वा
गुणैर्यमाश्रित्य परस्परेण ।
सिद्धाश्रमं शान्तमिवैत्य सत्त्वै-
र्नैसर्गिकोऽप्युत्ससृजे विरोधः ॥”)
विरोधकरणे दोषो यथा,—
“अथ पुत्रं रेणुका सा कृत्वा स्नेहात् स्तनन्धयि ।
उवाच किञ्चिद्वचनं परिणामसुखावहम् ।
अविरोधो भवाब्धौ च सर्व्वमङ्गलमङ्गलम् ।
विरोधो नाशबीजञ्च सर्व्वोपद्रवकारणम् ॥
अकर्त्तव्यो विरोधश्च दारुणैः क्षत्रियैः सह ।
प्रतिज्ञा चैषा कर्त्तव्या मदीयं वचनं शृणु ॥”
इति ब्रह्मवैवर्त्ते गणपतिखण्डे २९ अध्यायः ॥